ॐ नमस्ते गणपतये ॥

त्वमेव प्रत्यक्षं तत्त्वमसि ॥

त्वमेव केवलं कर्ताऽसि ॥

त्वमेव केवलं धर्ताऽसि ॥

त्वमेव केवलं हर्ताऽसि ॥

त्वमेव सर्वं खल्विदं ब्रह्मासि ॥

त्वं साक्षादात्मासि नित्यम् ॥१॥

| | |
|---|---|
| ऋतंवच्मि।правильно говорю<br>सत्यंवच्मि॥२॥ | 2. ритам - правильно, праведно, справедливо; вачми - говорю; сатйам - истинно, действительно; вачми - говорю. |

ऋतं वच्मि ।। सत्यं वच्मि ।।२।।

अव त्वं माम् ।। अव वक्तारम् ।।

अव श्रोतारम् ।।

अव दातारम् ।। अव धातारम् ।।

अवानूचानमव शिष्यम् ।।

अव पश्चात्तात् ।।अव पुरस्तात् ।।

अवोत्तरात्तात् ।।अव दक्षिणात्तात् ।।

अव चोर्ध्वात्तात् ।।अवाधरात्तात् ।।

सर्वतो मां पाहि पाहि समन्तात् ।।३।।

त्वं वाङ्ग्मयस्त्वं चिन्म॒यः ।।

त्वमानंदमयस्त्वं ब्रह्म॒मयः ।।

त्वं सच्चिदानंदाद्वितीयो॒ऽसि ।।

त्वं प्र॒त्यक्षं॒ ब्रह्मासि ।।

त्वं ज्ञानमयो विज्ञानमयो॒ऽसि ।।४।।

सर्वँ जगदिदं त्व॑त्तो जा॒यते ।।

सर्वँ जगदिदं त्व॑त्तस्ति॒ष्ठति ।।

सर्वँ जगदिदं त्वयि ल॑यमे॒ष्यति ।।

सर्वँ जगदिदं त्वयि॑ प्रत्ये॒ति ।।

त्वं भूमिरापोऽनलोऽनि॑लो न॒भः ।।

त्वं चत्वारि वा᳚क्पदा॒नि ।।५।।

त्वं गुणत्रयातितः

त्वमवस्थात्रयातितः ।।

त्वं देहत्रयातितः ।।

त्वं कालत्रयातितः ।।

त्वं मूलाधारः स्थितोऽसि नित्यम् ।।

त्वं शक्तित्रयात्मकः ।।

त्वां योगिनो ध्यायन्ति नित्यम् ।।

त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वं

इन्द्रस्त्वं अग्निस्त्वं वायुस्त्वं सूर्यस्त्वं

चंद्रमास्त्वं

ब्रह्म भूर्भुवःस्वरोम् ।।६।।

गणादिं पूर्वमुच्चर्य

वर्णादिं तदनंतरम् ।।

अनुस्वारः परतरः ।।

अर्धेन्दुलसितम् ।।तारेण ऋद्धम् ।।

एतत्तव मनुस्वरुपम् ।।

गकारः पूर्वरुपम् ।।

अकारो मध्यमरुपम् ।।

अनुस्वारश्चान्त्यरुपम् ।।

बिन्दुरुत्तररुपम् ।।नादः संधानम् ।।

संहितासंधिः ।।सैषा गणेशविद्या ।।

गणकऋषिः ।।निचृद्गायत्रीच्छदः ।।

श्री महागणपतिर्देवता ।।

ॐ गं गणपतये नमः ।।७।।

ए॒क॒दं॒ताय॑ वि॒द्महे ।

वक्रतु॒ण्डाय॑ धीमहि ।।

तन्नौ दंतिः प्रचो॒दया᳚त् ।।८।।

एकदंतं चतुर्हस्तं

पाशमंकुशधारिणम् ।।

रदं च वरदं हस्तैर्बिभ्राणं

मूषकध्वजम् ।।

रक्तं लबोदरं शुर्पकर्णकं

रक्तवाससम् ।।

रक्तगंधानुलिप्तांगं रक्तपुष्पैः

सुपूजितम् ।।

भक्तानुकंपिनं देवं

जगत्कारणमच्युतम् ।।

आविर्भूतं च सृष्ट्यादौ प्रकृतेः

पुरुषात्परम् ।।

एवं ध्यायति यो नित्यं स योगी

योगिनां वरः ।।९।।

नमो व्रातपतये । नमो गणपतये ।

नमः प्रमथपतये ।नमस्तेऽस्तु

लंबोदरायैकदंताय ।

विघ्ननाशिने शिवसुताय ।

श्रीवरदमूर्तये नमः ॥१०॥